© 2017 IJSRST | Volume 3 | Issue 6 | Print ISSN: 2395-6011 | Online ISSN: 2395-602X

# महाकविभासस्य महाभारतकथाश्रितरूपकेषु प्रतिनायकीय भूमिकायाः विवेचनम्



**डॉ0 रेखा सिंह**

**1ए, बी.के. बनर्जी मार्ग नया कटरा,**

**इलाहाबाद**

महाकविभासः स्वकृतिषु पात्राणामतीव सजीवं मनोवैज्ञानिकं चित्रणं प्रस्तौति। तस्य रूपकेषु प्रायशः नायकप्रतिनायकयोर्निर्णयोऽपि कठिनो जायते। भातकृतनाटकेषु पात्राणां (नायकप्रतिनायकानां) मध्ये ये संघर्षः अन्तर्द्वन्द्वः घातप्रतिघातश्च संयोजिताः, ते पात्राणां दृष्ट्या, कथानस्य च दृष्ट्या कियदुपादेयाः सन्ति इति परीक्षणीयम्। महाभारतकथाश्रितरूपकाणामालोके यदि कथ्यते यत् भासः कौरवाणां पक्षे पतति चेत् नात्युक्तिर्भविष्यति। अतएव भासकृतानां महाभारतकथाश्रितरूपकाणां विवेचनं प्रसंगोपेतमस्ति –

**बालचरितम्–** पंचांकीये रूपकेऽस्मिन् कृष्णजन्मन आरम्भ कंसवधं यावत् कृष्णस्य बाललीला वर्णितास्ति। अत्र कृष्णचरितस्य रूपत्रयं वर्णितम्। प्रथमं, वसुदेवस्य सन्तानरूपे कृष्णस्य जन्म तथा च वसुदेवेन मथुरां प्राप्य नन्दगोपस्य मृतपुया सह कृष्णस्य विनिमयः।[1] सा नन्दनन्दिनी वसुदेवस्य हस्तयोः आगत्य जीविता जाता।

द्वितीयं च, चाण्डालयुवतीनामलक्ष्याश्च दुष्टता। (राज्यलक्ष्म्या अभावः)। कालरात्रिमहानिद्रापिंगलाक्षिभिः पुनश्च मधूकमुनेः शापेनापि कंसपतनस्याभासः। वसुदेवकन्याया वधकाले कन्यायाः भागद्वये विभाजनं स्वर्गारोहणं च। यस्मात् कंसेन स्वकालरा«याः आभासः।[2]

तृतीयं, संकर्षणदामकादिभिर्गोपैर्गोपिकाभिः सह दामोदरस्य श्रीकृष्णस्य बाललीला[3] एवम् अरिष्टषर्भस्य[4] कालियनागस्य च दर्पदमनम्[5]। तथा च चाणूरमुष्टिकादिभिर्मल्लैः सह युद्धं प्रदर्शयन् अन्ततः कंसवधश्च।[6]

**पंचरात्रम्–**'पंचरात्रम् रूपकं कीथमहोदयेन समवकाररूपकस्य श्रेण्यां परिगणितम् इदमपि रूपकं महाभारतकथाश्रितम् अस्ति। यद्यपि आचार्यः बलदेवोपाध्यायः[7] अस्य रूपकस्य बीजं महाभारते नैव पश्यति। अतः रूपकमिदं कवेमौर्लिककल्पनाश्रितं मन्यते। भासकविना स्वरूपकेषु चरित्रप्रधाननायकत्वेन चित्रितो दुर्योधनः। सामाजिकेभ्यश्च तं प्रति सहानुभूतिं प्रशंसां च प्राप्तुं सफलो भवति भासः। पंचरात्रेऽपि स कविः दुर्योधनं न्यायप्रियमुदारम् आज्ञाकारिणं शकुनेर्दुःशासनस्य च प्रभावात् मुक्तं सज्जनं चित्रयति। अत्र दुर्योधनचरित्रे न कोऽपि दुर्गुणः समाविशति यस्मात् स प्रतिनायको भवितुमर्हति। प्रत्युतं तस्य गुरुभक्तिः, शकुनिना भ्रामितेऽपि तस्य दृढ़ता, कर्णेन सह तस्य मित्रता मन्त्रणा च, अभिमन्युं प्रति तस्यानुरागादयो गुणाः तं श्रेष्ठनायकं सिद्धयन्ति।

कथाया मुख्यफलम्–अर्द्धराज्यप्राप्तिर्नापितु दुर्योधनेन दानमाध्यमेन गुरूदक्षिणारूपात् ऋणाद् मुक्तिरेवास्ति।[8] सत्यस्यास्य स्थापनैव रूपकस्य मुख्यफलम् उद्देश्यं चास्ति।[9] अस्य सर्वाणि चरित्राणि परस्परं ग्रथितानि सन्ति। एकस्याभावे अपरस्य चरित्रं नीरसमेव प्रतीयते।

भासस्य दुर्योधनो यथार्थस्य भूमौ तिष्ठति। स जानाति यत् मानवस्य शुभाशुभकर्मणां फलम् अत्रैव प्राप्यते–

**कृतश्रद्धो ह्यात्मा वहति परितोषं गुरूजनो**

IJSRST1936135 | Received : 01 July 2017 | Accepted : 20 July 2017 | July-August-2017 [(3) 6: 806-814]

**जगद् विश्वस्तं मे निवसति गुणो नष्टमयशः।**

**मृतैः प्राप्यः स्वर्गो यदिह कथयत्येतदनृतं,**

**परोक्षो न स्वर्गो बहुगुणाभिहैवैष फलति।।**[10]

दुर्योधनः स्वस्य क्रूरतां जिह्मतां चातीतस्य कथां स्वीकरोति। तां विनिन्दति[11] चापि। द्रोणेन दक्षिणायाचने शकुनिना कृतोत्साहे, भीष्मेन द्रोणेन च शकुने तिरस्कृतेऽपि, दुर्योधनस्य तर्केषु बलो दृश्यते। स द्रोणाचार्यं पृच्छति यदि पाण्डवैः सहान्यायमभवत् तर्हि तदैव कथं न प्रतिरोधः कृतः[12] दुयोधनस्य प्रश्नोऽयं तर्कसंगतोऽस्ति। अवसरेऽस्मिन् द्रोणास्य क्रोधः, भीष्मस्य च संकथनं यत्–

''अन्यत् प्रस्तुतमन्यदापतितम्'' कथावस्तु संकलयति। दुर्योधनचरित्रे च महत्त्वपूर्णं परिवर्तनं विदधाति। राज्यार्द्धदानविषये शकुनिना वर्जने कृते स वदति यत्–**गुरू दक्षिणा तु दातव्या एव ''दातव्यमिति वक्तुमर्हति''**[13] अतः शकुनेरविरोधैरपि दुर्योधनचरित्रं बलीयते। शकुनिरपि अतीव चातुर्येण सनियमं राज्यार्द्धदानाय प्रेरयति दुर्योधनम्। ''यदि पंचरात्रेण पाण्डवानां प्रवृत्तिरूपनेतव्या राज्यस्यार्द्धं प्रदास्यति।''[14] परन्तु अन्ततो भीष्मो द्रोणश्च कूटनीत्योः साफल्यं प्राप्नुतः। ते चिन्तकाः विराटनगरमाक्रमयितुं दुर्योधनं संबाध्य पंचरात्रिष्वेव पाण्डवानाम् अस्तित्वंबोधयन्ति।[15] अन्ततः नियमानुसारं दुर्योधनः पंच राज्यानि प्रददाति।

अत्र हि दुर्योधनः स्वस्य पौराणिकस्वरूपात् विपरीतः सत्यसन्धः दृढप्रतिज्ञो नीतिनिपुणो वीरः सदाचारी नायकरूपेण च चित्रितः। पौराणिकपरम्परामनुसृत्य यदि दुर्योधनः प्रतिनायकः स्वीक्रियते चेत् स धीरोदात्तः प्रतिनायको भवति। प्रतिनायकस्य ततोऽधिकं साफल्यं किमस्ति यत् तस्मिन् चरित्रे नायकस्य गुणाः स्वभावजन्याः एव प्राप्यन्ते। अत्र हि भासस्य अत्यधिंक साफल्यमस्ति यत् स पौराणिकं प्रतिनायकं प्रति सामाजिकेभ्यः सहानुभूतिमादाने सफलो भवति। पंचरात्रे नाटके भासकविः प्रतिनायकरूपेण द्रोणाचार्यं भीष्मं च प्रस्तौति। द्रोणो भीष्मश्च द्वावेव कुटिलौ वाक्पटू कूटनीतिज्ञौ च चित्रितौ। रूपकेऽस्मिन् प्रकारान्तरेण कलहप्रियोऽपि उच्यते द्रोणः।

**द्रोणः–माऽत्र कर्दनं कार्यं, कलहः एव भवतु।**[16] तस्मिन् द्रोणे क्रोधाधिक्यं[17] दृश्यते। यतः स औद्धत्यभावेन प्रदर्शितोऽत्र।[18] द्रोणः आदर्शप्रतिनायको वर्णितः। यः दुर्योधनस्य गुणैरभिभूतोऽस्ति।[19] तस्य कपटं विजानाति।[20]

अत्रापि द्रोणः प्रियशिष्यान् (पाण्डवान्) प्रति तथैव पक्षपाती दृश्यते यथा पौराणिकथानकेषु।[21] भीष्मस्यापेक्षया अधिको नीतिज्ञः प्रत्युत्पन्नमतिश्चास्ति सः। त्वरितनिर्णयसमार्थ्यमपि अधिकमेवास्ति द्रोण।[22] किन्तु शकुनेः घातप्रतिघातानामुत्तरं पितामहस्य पार्श्वे एवास्ति।[23] पितामहश्च यथासमयं द्रोणाचार्यस्य मार्गदर्शनं करोति।

संक्षेपतः द्रोणाचार्यस्य भीष्मस्य च साहाय्येन दुर्योधनात् पाण्डवेभ्यो राज्यसम्भागस्य कथाद्वारा नाटककारो दुर्योधनस्य अपौराणिकं स्वरूपं प्रथयति। कस्यापि कवेः नाटककारस्य वा इदमेव साफल्यं भवति यत् स कथाया मार्मिकं स्थलं बुध्येत्। महाभारतकथाया अंशमिमं नाटककारः कल्पनया सह निबद्वयति। प्रशंसनीयोऽयं प्रयासः। ''पाण्डवेभ्योऽहं सूचिकाग्रं भूमिभागं नैव दास्यामि'' दुर्योधनस्य कलंकमिमं सम्मार्जितुं कवि सामाजिकानाम् अन्तःकरणं कियता सज्जयति, इति वक्तव्यं नास्ति। अत्र हि लेखकेन दम्भी कलहप्रियो दुर्व्यसनी क्रूरो दुर्योधनः दर्शकानां समक्षं नूतनसच्चरित्रशिष्टदृढप्रतिज्ञनायकत्वेन चित्रितः। भीष्मद्रोणशकुनिकर्णाभिमन्यवादीनां चरित्रबलेन दुर्योधनस्य नायकत्वं चित्रितुं तथा च दुर्योधनं प्रति सामाजिकानां सहानुभूतिं प्राप्त्यर्थं पूर्णसफलो भवति भावकविः।

**मध्यमव्यायोगः—** भासकृतरूपकमिदं व्यायोगविधायां लिखितं एकांकिनाटकमस्ति। मध्यमव्यायोगस्य कथायां पाण्डवानां वनवाससमयस्य कथा वर्णितास्ति। भीमघटोत्कचयोर्मध्ये संघर्षः तथा च घटोत्कचस्य शक्तिप्रदर्शनेन सहैव वने भीमस्य प्रेयस्या हिडिम्बायाः ब्राह्माणानां च कार्यसम्पादनाय समपर्तिस्य भीमस्य चरित्रकथावर्णिताऽस्ति। नायकप्रतिनायकोः दृष्टया विचार्यते चेदवलोक्यते यत् व्यायोगस्य सम्पूर्णकथातत्त्वं घटोत्कचं परितः एव ग्रथितं वर्तते। अतः स एव नायको मन्यते। स च मातृभक्तः आज्ञाकारी पुत्र आसीत्। यस्मिन् दयाभावोऽपि पर्याप्तरूपेण प्राप्यते—

**जानामि सर्वत्र सदा च नाम द्विजोत्तमाः पूज्यतमाः पृथिव्याम्।**

**अकार्यमेतच्च मयाऽघ कार्ये मातुर्नियोगादपनीय शंकाम्।।**[24]

घटोत्कचस्य मातृभक्तया भीमोऽपि अभिभूतोऽस्ति।[25] प्रतिनायकभीमस्य योजनायाः उद्देश्यमपि घटोत्कचस्य शक्ति परीक्षायामेव निहितां वर्तते इति प्रतीयते— ''यदि ते शक्तिरस्ति बलात्कारेण मां जय''।[26] यद्यपि हि भीमस्य आगमनं ब्राह्मणानां रक्षार्थमेव भवत्। अस्मिन्नाटके सर्वत्र भीमस्य कार्यकलापेषु संवादेषु च घटोत्कचस्योत्तेजना वीररूपं च प्रकाशितं—

**आक्रम्य राक्षसमिमं ज्वलदग्ररूप—**

**मुग्रेण बाहुबलवीर्यगुणेन युक्तम्।**

**एष प्रयाति शनकैरवधूय शीघ्र—**

**आसारवर्षमिव गोवृषभस्सलीलम्।।**[27]

भासकविना पितापुत्रौ क्रमशः नायकप्रतिनायकरूपेण वर्णितो। कीथमहोदयेन व्यायोगेऽस्मिन् घटोत्कचस्य प्रमुखता (नायकत्वम्) स्वीक्रियते।[28] घटोत्कचस्य नायकत्वं स्वीकृते सति भीमस्य प्रतिनायकत्वं स्वत एव सिद्धयति। भीमः घटोत्कचमुत्साह्य तस्य शौर्य पराक्रमं शक्तिं च उद्बोधयति। प्रतिनायकस्य भीमस्याभावे तु संघर्षस्य स्थितिरेव नायाति। यतो हि मध्यमो ब्राह्मणस्तु पूर्वमेवात्मानं समर्पयति स्म। भीमश्च तस्य मायायाः प्रतिकरं कृत्वा[29] उत्तरं ददाति। युद्धै च प्रहाराणामुत्तर[30] ददाति। अन्ततश्च मात्रा परिचयं प्राप्य आत्मसमर्पणम्[31] इति सर्वमाहत्य भीमः प्रतिनायकभूमिकां शक्तियुतां करोति। तदैव भीमोऽनुभवति यत् तस्य मुख्यप्रतिद्वन्द्विनो दुर्योधनस्य पराजयोऽवश्यम्भावी[32] जातः। इत्थं नायकः प्रतिनायकश्च द्वावेव परस्परं चरित्रमुत्कर्षयन्तः।

**दूतवाक्यम्—** महाभारतस्य युद्धारम्भे एव युद्धमपवारितुं श्रीकृष्णं दूतरूपेण प्रस्तुत्य भासकविः महाभारतस्य अस्मिन् कथांशे नवीनतामानयति। अत्र हि श्रीकृष्णः दुर्योधनश्च द्वावेव उद्धातस्वभावौ वर्णितौ। तयोः नायकप्रतिनायकयोर्निर्णयोऽपि दुष्करो भवति।

दुर्योधनस्य अहं भावनया कृष्णं प्रति तस्य घृणा भावनया तथा च कृष्णं वन्दिनं कर्तुं तस्योपक्रमेणैव स प्रतिनायकः स्वीक्रियते। यस्य समर्थने श्रीकृष्णस्य कथमदिम् उदाहर्त्तव्यमस्ति—

**दुष्टवादी गुणद्वेषी शठः स्वजनर्निदयः।**

**सुयोधनो हि मां दृष्ट्वा नैषा कार्यं करिष्यति।।**[33]

भासः श्रीकृष्णस्य नारायणस्वरूपं प्रकाशयितुं वांछति। परन्तु किं स कृष्णं नायकत्वेन चित्रितुमिच्छति ? जिज्ञासेयं स्वभावजन्यास्ति। यतो हि अत्र भासेन कृष्णस्य (नारायणस्य) औद्धत्यं प्रस्तुत्। सम्भवतः भासः नारायणाय एव प्रतिनायकत्वं प्रदाय प्रतिनायकभूमिकामपि गौरवन्वितां कर्तुमिच्छति। अनेने नारायणस्य नायकत्वं तु बाधते परन्तु तस्य नारायणत्वस्य हानिर्भवति। तत्तु अखण्डितमेव। भासः दुर्योधनं पापिनं व्यसनिनं लोभिनं च नैव वर्णयति अपि तु कृष्णस्य नारायणत्वं प्रति तस्य दुर्योधनस्य मात्सर्यं प्रकाशयति। दुर्योधनः कृष्णस्य अपमानाय न कमपि अवसंर परित्यजति परन्तु श्रीकृष्णस्य

अद्भुतचरित्रस्यालोके स वारं–वारं स्वमस्तकं नमति। यथा कृष्णस्य सभाभवने प्रवेशसमये सम्भ्रमवशात् सर्वे राजानः तस्य सत्काराय आसन्दात् उत्तिष्ठन्ति। तदा दुर्योधनः आसन्दात् पतति, मन्ये स दण्डवत् प्रणमति श्रीकृष्णम्।[34] आरम्भादेव श्रीकृष्णस्य अपमानविधानाय विनिश्चयति सः।[35] कृष्णः दूतभावेन युधिष्ठिरस्य संदेश सम्प्रेषयति। परन्तु दुर्योधनो वाग्युद्धं प्रारभते। अत्र दुर्योधनस्य नायकत्वं स्वयमेव सिद्धयति। तत्रापि कृष्णस्य दौत्यविधा (कथनविधापि) नोचिता। प्रथमतः तेन अर्जुनस्य गाथा गीयते।[36] तदन्तरं दुर्योधनं प्रति अर्जुनस्य अनुग्रहः उच्यते।[37] अनन्तरं तर्जयति।[38] अत्र दुर्योधनः सर्वेषामाक्षेपाणां समुचितमुत्तरं ददाति।[39] कृष्णेन शठः बान्धवनिःस्नेहः काकः केकरः प्रभृतीनां सम्बोधनामामुत्तरे[40] स कृष्णं गोपालः पशपः इति तुच्छविशेषणैः सम्बोधयन् कृष्णस्य वीरतायां प्रश्नचिन्हं क्षिपति सः। कृष्णं च कारागारे[41] पातितुं प्रयासं करोति दुर्योधनः।

तदैव श्रीकृष्णस्याद्भुतशस्त्राणामुपस्थितिरेव दुर्योधनं पराजयति। अत्र शस्त्राणां मानवीकरणं प्रस्तुतम्। अत्राभुद्तास्राणामुपस्थितिः श्रीकृष्णस्य पराजयमेव सूचयति। यतो हि दुर्योधनस्योक्तिभिः पराजितः सः निजकर्त्तव्यात् (दौत्यकर्मणः) भ्रष्टो भूत्वा उग्ररूपेण युद्धाय उत्तेजयति दुर्योधनम्। अत्र दुर्योधनस्य उत्तेजनाया मूले, युद्धस्यावश्यंभाविस्थितौः च कृष्णस्य दौत्यकर्म एव उत्तरदायित्वं वहति। दृष्टयानया यदि श्रीकृष्णं प्रतिनायंक दुर्योधनं च नायकं स्वीकुर्वन्ति तर्हि अनुचित न भवति जनाः। यदि दुर्योधनः प्रतिनायकः स्वीक्रियते चेत् कृष्णस्य नारायणत्वस्य समक्षं तु सदैव स पराजित एव। परन्तु कृष्णस्य नायकत्वे तु समक्षः दुर्योधनः (प्रतिनायकः) प्रबल एव दृश्यते। यतो हि अन्ततः कृष्णः स्वस्य विराटरूपं स्वीकृत्य एव दुर्योधनं शामयितुं समर्थो। भवति।

यदि अत्र दुर्योधनस्य नायकत्वं कृष्णस्य च प्रतिनायकत्वं स्वीक्रियते चेत् अधिकमेव उचितं प्रतीयते। यतो हि दुर्योधनस्य भूमिका कृष्णस्य प्रतिनायकत्वेन समक्षं अधिकं सशक्तं प्रतीयते। सहैव भासस्य क्रान्तिदृष्टयानुरूपमेवास्ति, अयं विचारः। एकदा पुनः भासकविः दुर्योधनं लोकविश्रुते रूपैर्विपरीतेन नायकत्वेन तथा च नारायणं श्रीकृष्णं प्रतिनायकत्वेन प्रस्तौति। यदि दुर्योधनस्य प्रतिनायकत्वं स्वीक्रियते तर्हि इदमपि कथनीयं भवति यत् स कृष्णादधिक एव समर्थोऽस्ति। यतोहि आत्मसमर्पणाय श्रीकृष्णं बाधते स। अन्ततश्च श्रीकृष्णः स्व–शस्त्राणामाह्वानं करोति स्वरक्षार्थं।

अत्र हि श्रीकृष्णस्य दुर्योधनस्य च भूकिाद्वयमेव परस्परेण उत्कर्षे साहाय्यं भवति। इदं तु सामाजिकानां विवेकबुद्धौ निर्भरमस्ति यत् ते कं नायकं प्रतिनायकं वा स्वीकुर्वन्ति।

**कर्णभारम्–** महाभारतकथाश्रिते एकांकिनाटकेऽस्मिन् कर्णेन इन्द्राय कवचकुण्डलयोर्दानकथा वर्णिता वर्तते। दानमिदं कर्णस्य दानप्रियतां तु द्योतयति एव, सहैव तस्य शक्तेः वीरतायाः दर्पस्यापि परिचायकमस्ति। प्रसंगेऽस्मिन् कर्णस्य नायकत्वम् इन्द्रस्य च प्रतिनायकत्वं स्वतः सिद्धमस्ति। अत्र प्रतिनायक इन्द्रः स्वकार्याय पश्चात्तापमपि करोति। अतः देवदूतेन स्वकार्याय (वंचनेन कवचकुण्डलग्रहणत्वात्) कर्णं क्षमां याचते। तथा च एकवधाय समर्थों विमलेति अमोघशक्तिं प्रददाति तस्मै। शल्यः इन्द्रस्य कुकृत्यं विज्ञाय कर्णं दानात् निवारयति। अत्र हि शल्यस्य परामर्शेन कर्णस्य दृढ़ता वचनवद्धता परिलक्ष्यते।[42] दानस्य पश्चात् पश्चाताप भावनायाः अभावः तथा च इन्द्रस्य कृतार्थव्याजेन स्वां विजयिनं मत्वा कर्णस्य गर्वः एव तं नायकत्वानुकूलं व्यक्तित्वं प्रददाति।[43] कर्णः इन्द्राय सहस्राधिकं गावः प्रदातुमन्यान्यानेकानि वस्तूनि प्रदातुं वदति। परन्तु इन्द्रः सर्वमपि अस्वीकरोति। इन्द्रस्य अस्वीकृत्य एव कर्णस्य दानप्रियताया नायकत्वस्य चाधारशिला भवन्ति।

इन्द्रस्याभावे कर्णस्य दानप्रियतायाः परिचयोऽपि शक्यः। अथवा इन्द्रेण यदि गजाश्वगवामादानेन संतुष्टं भवति तर्हि कर्णस्य तावत् महत्त्वं स्थापितुं न शक्यते, यच्च कवचकुण्डलयोर्दानेन भवति। नायकचरित्राय प्रतिनायकस्य सैव उपयोगितानुभूयते।

**दूतघटोत्कचम्**–रूपकेऽस्मिन् अभिमन्युवधोपरान्तं महाभारतयुद्धस्य विभीषिकां शमयितुं पुनः पुनः घटोत्कचं दूतत्वेन प्रेषयन्ति। घटोत्कचस्य दुयोधनस्य च पारस्परिकैः संवादैर्युक्ते रूपकेऽस्मिन् भासेन घटोत्कचः पुनरपि नायकत्वेन प्रस्तुतः। अत्र दुर्योधनः शकुनिश्च प्रतिनायकरूपेण वर्णितौ वर्तेत।

करूणवातावरणे विरचितं रूपकमिदं वीररसप्रधानमस्ति। दुर्योधनस्य घटोत्कचस्य शकुनेश्च कटूक्तयो वीररसप्रवाहे घृताहुतिं क्षिपन्ति। मध्यमव्यायोगस्यापेक्षया नाटकेऽस्मिन् घटोत्कचोऽधिक एव वीरः प्रौढः मुखरश्च प्रतीयते। स दुर्योधनादीनां कटूक्तीनां यथोचितं प्रत्युत्तरं प्रददाति।

**''जिह्वासंचालनमात्रेण पृथिवीं विजेतुं न शक्याः''**[44] पाण्डवाः इति शकुनेः संकथनेन घटोत्कचस्तं प्रेरयन् धिक्कारयन्[45] वदति–''अयि द्यूतकार! अक्षान् त्यक्तवा युद्धाय सज्जयतु स्वाम्।'' रणभूमिरस्ति इयम्। अत्र न तु स्त्रीणामपहरणं कर्त्तव्यं नापितु कूटनीतिमेव प्रचलित। अत्र हि तीक्ष्णबाणैः मित्रता कर्त्तव्या भवति। प्राणपणेनापि युद्धं कर्त्तव्यं भवति। तस्य वचनेन दुर्योधनोऽतिक्रुद्धो भवति, वदति च–त्वं राक्षसीपुत्रोऽस्ति। अतः मातुलाय एवं दुर्वचनं वदति। त्वया इदं ज्ञातव्यं यत् वयमपि अतिक्रोधिनस्तथा राक्षसा इवोग्राः स्मः।[46] दुर्योधनस्य कथनस्यास्य (राक्षसीपुत्राभिधानस्य) अतिनिष्ठुरो सम्यकतयामुत्तरं ददाति घटोत्कचः। तस्य एवं प्रतिवाचनं संस्कृतसाहित्येऽन्यत्र दुर्लभमेवास्ति। स वदति यत्–**''शान्तं पापं, शान्तं पापम्। राक्षसेभ्योऽपि भवन्त एव क्रूरतराः।**[47] कुतः–

**न तु जतुगृहे सुप्तान् भ्रातॄन् दहन्ति निशाचराः**
**शिरसि न तथा भ्रातुः पत्नीं स्पृशन्ति निशाचराः।**
**न तु सुतवधं संख्ये कर्तुं स्मरन्ति निशाचराः**
**विकृतवपुषोऽप्युग्राचाराः घृणा न तु वर्जिता।।**

अनेनाभिक्रुद्धो दुर्योधनो वदति यत्[48] भवान् दूतः कल्पितः। वयं च दूतवधं नोचितं जानीमः। अतः इतः संदेशं श्रुत्वा गच्छतु। तदा घटोत्कचो वदति यत् स कायरो नापितु दुर्योधनस्य कृपाकांक्षी। अतः[49] वदामि–''प्रहरध्वं समाहृता'' सर्वे समाहतामयि प्रहारं कुरूत। परन्तु अहमभिमन्युः नास्मि। यः प्रत्यंचाभंगमात्रेण निःशस्त्रो भविष्यति। अत्र तस्य संकथनेन कौरवाणां कायरता, युद्धोचितमर्यादोल्लंघनस्य निन्दा तथा च स्वशक्तेर्जयघोषो ध्वन्यते। स्वस्य सम्पूर्णे एव चरित्रे घटोत्कचः वीरो युद्धप्रियस्तर्कपटुः धीरोद्धतनायकः प्रतीयते। स आज्ञापालकः शिष्टाचारयुतश्चास्ति। स राक्षसो भूत्वापि दुर्योधनादिभिः श्रेष्ठ एव। दुर्योधनश्च प्रचण्डो दर्पी उद्धतः प्रतिनायकत्वेनैवदृश्यते।

दुर्योधनस्य महत्त्वाकांक्षा दर्पः शत्रुपक्षस्य (पाण्डवानां) हानौ तस्य प्रसन्नता,[50] शकुनिमन्त्रणया विरूद्धा पितृभक्तिः, पितुः प्रश्नानां तर्कपूर्णोत्तरादय एव तस्य प्रतिनायकत्वं स्पष्टयन्ति। स वीरक्षत्रिय इव कृष्णसन्देशस्योत्तरं ददाति–

''तिष्ठ त्वं सह पाण्डवैः, प्रतिवचो दास्यामिते सायकेः[51] अर्थात् भो! कृष्ण! त्वं पाण्डवैः सह भव। मम वंशं प्रति सद्भावनां स्वीकीये हृदये निधाय अहं तव सद्भावनायाः प्रत्युत्तरं रणभूमौ सायकैरेव दास्यामि। अनेनवाक्येन दुर्योधनस्य निर्भीकता, औद्धत्यं, दर्पः, असहिष्णुता प्रचण्डतादयो भावाः अभिव्यंजन्ते। स छलछद्माश्रित्य अर्जुनस्य प्रतिज्ञां त्रोटितुं प्रयतते। सर्वे एव व्यवहारोऽयं दुर्योधनस्य प्रतिनायकत्वमेव सिद्धयति। पाण्डवानां पराक्रमः घटोत्कचस्य चोक्तयः तस्योद्धतस्वरूपं प्रकाशितुं साहाय्या एव भवन्ति। घटोत्कचस्य दूतकल्पस्य कूटनीतिकव्यवहारस्यापि औचित्यमासीत् कौरवाणां नतयुतिः। तेषां शस्त्रस्यात्यागे तान् मृत्योः पाशे कर्षितुमेवासीदियं योजना। कदापि कृष्णः स्वयमेव दूतो भवति तु कदापि घटोत्कचं प्रेषयति। अत्र दुर्योधनस्य अत्युद्धतस्वरूपं प्रकाशितुं नायकस्य (घटोत्कचस्य) उक्तयः अग्नौ घृताहुतिरिव कार्यं कुर्वन्ति।

**उरूभंगम्**–भासस्येदमेकांकि प्रबन्धदृष्टया अतिमहत्वपूर्णमस्ति। रूपकस्यास्य विष्कम्भे या पूर्वकथा वर्णितास्ति, तया को नायकः कश्च प्रतिनायकोऽस्ति निर्णयोऽयमतिकठिनः जायते। अत्र हि मंचे पाण्डवपक्षीयपात्राणामभावो वर्तते तथापि ते सम्पूर्णे नाटके विद्यन्ते। मंचे केवलं दुर्योधनबलरामधृतराष्ट्रदुर्जयगान्धारीणामेव भूमिका वर्तन्ते। अत्र यदि कथ्यते यत् भासः कौरवाणां पक्षपाती आसीत् तर्हि नात्युक्तिर्भविष्यति।

उरूभंगे भासकविना अतिमार्मिकप्रसंगः कथाया आधारः स्वीकृतः विष्कम्भकेन ज्ञायते यत् कृष्णस्य चातुर्येणैव दुर्योधनस्य जघनं भंजितं जातम्– **''एष इदानीमपहायस्यमानं भीमसेनं दृष्ट्वा स्वमरूमभिहत्य कामपि संज्ञां प्रयच्छति जनार्दनः।''**[52]

तदैव क्रोधे बलरामो दुर्योधनमाश्वासयाति यत् स भीममवश्यमेव हनिष्यति। परन्तु दुर्योधनस्तं बोधयति यत् विग्रहो नष्टः,[53] इदानीं वैरवर्द्धनेन न कोऽपि लाभो भविष्यति–

**प्रतिज्ञावसिते भीमे गते भ्रातृशते दिवम्**

**मयि चैवं गते रामः विग्रहः किं करिष्यति।।**[54]

दुर्योधनः स्वीकरोति यत्–भीमेन छलितो नास्ति सः। अपितु जगत्प्रियः कृष्णः एवं परमकृपया भीमस्य गदां प्रविश्य स्वतः मृत्योर्मूखे प्रवेशयति तम्।[55] यद्यपि हि दुर्योधनः स्वस्थित्या दुःखितोऽस्ति। परन्तु पाण्डवान् प्रति कृतापराधानां विषये स आत्मग्लानिमनुभवति।[56] तस्य दुरवस्थया दुर्जयेन च तस्य संवादोऽतीव मार्मिकोऽस्ति।[57] दुर्योधनस्य निराशया हताशया च स्वयं बलदेवोऽपि विचलितो जातः। अश्वत्थामापि दुर्योधनस्यावस्थामवलोक्य प्रतिकाराय तत्परो भवति तदा दुर्योधनो वदति– ''वयं चैव भूता गुरूसुत! धनुर्मुंचतु भवान्''[58] अर्थात् यदा सर्वे बान्धवाः मृताः (हताः) भीष्मः कर्णश्च सर्वे दिवंगताः। तदा धनुरूत्थाय किं करिष्यामि? वस्तुतोऽत्र प्रतिनायका पाण्डवाः कृष्णादयः प्रत्यक्षाः नैव दृश्यन्ते। तथापि नायकस्य (दुर्योधनस्य) चरित्रे औद्धत्यस्य पराक्रमस्य पश्चात्तपस्य च भावनां प्रकाशियतुं सहायका भवन्ति ते। अत्र विचारणीयमिदं यत् कृष्णः पाण्डवानां साहाय्यं न क्रियते चेत् तदा दुर्योधन इवाप्रतिहत वीरस्य वधः कथं सम्भवः आसीत्। अस्य समाधानं स्वयमेव दुर्योधनः प्रस्तौति।[59] दुयोधनवधार्थं श्रीकृष्णेन ये केचन् संकेताः कृताः ते युद्धनियमैर्विरूद्धाः सन्ति। भासोऽपि दुर्योधनमेव रूपकस्य नायकं प्रदर्शयितुमिच्छति। अत एव दुर्योधनस्य एकालापैर्युक्तेऽस्मिन् रूपके तस्य बहुगुणीव्यक्तित्वं चित्रयति भासः। कृष्णस्य घृणितसंकेतानां नीतेश्च परिप्रेक्ष्ये भीमस्य कर्म हेयं मत्वा सः प्रतिनायकस्तथा दुर्योधनः नायकः स्वीक्रियते। नात्र कोऽपि दोषः। अत्र प्रतिनायको भीमः प्रत्यक्षतः मंचे न दृश्यते तथापि सम्पूर्णे नाटके तस्योपस्थितिः प्रतीयते उरूभंगकारणात्। स दुर्योधनस्य मनोरथानां भंजकोऽस्ति।[60] अत्र प्रतिनायकचरित्रं नायकचरितस्य विकासे प्रमुखाधारो अस्ति।

पूर्ववर्णितनाटकानां परिप्रेक्ष्ये प्रश्नोऽयं स्वाभाविको जातः यत् किं पौराणिकनायका एव नायका भवन्ति केवलम्? अथवा पौराणिककथानां प्रतिनायका अपि नायका भवितुमर्हन्ति? सन्दर्भेऽस्मिन् भारतीयसंस्कृतेः, विशेषतया संस्कृतसाहित्यस्य दर्शनस्य चालोके साहित्यिकमानवीयमूल्यानां सम्बन्धे व्यापकविवेचनामपेक्षते। कथनस्य आवश्यकता नास्ति काव्यसंसारसंरचनायां कविरेव प्रजापतिर्भवति तथा च तस्मै यत् रोचते तदेव रचयति सः।[61] महाकविर्भासोऽपि तथैवास्ति। येन दुर्योधनकर्णघटोत्कचादयो लब्धख्यातयः पौराणिकप्रतिनायकान् नायकत्वेन प्रस्तौति। सहैव सामाजिकेभ्यः तान् नायकान् प्रति सहानुभूतिमपि प्राप्नोति सः। नाटककारस्य साफल्यमेवेदम्। कविप्रतिभायाश्चमत्कार एवास्ति यत् स कविः नायकप्रतिनायकौ द्वावेव इत्थं प्रस्तौति यत् तयौः नायकत्वविषये निर्णयोऽपि दुष्करो जायते। भारतीयकर्मवादस्य परिप्रेक्ष्ये भासकविना यादृशः प्रश्नः प्रस्तुतः। यत्र अन्येषां रचनाकाराणां ध्यानमपि न गच्छति। नाटककाराः प्रायः छलकपटादिभिः कृतं पौराणिकप्रतिनायकानां संहारं केनापि प्रकारेण (धर्माचरणेन पराक्रम वा बलेन वा अन्येन कारणेन) तर्कयुक्तमेव सिद्धयन्ति। प्रतिनायकः कियदपि बली

पराक्रमी वा स्याद् (राक्षसः बालिसदृशाः वा) तथापि स सदैव नायकेन बध्य एव दृश्यते। तत्रैवमहाकविभासः पात्राणां मनोवैज्ञानिकं सजीवं चित्रणं प्रस्तौति। नायकप्रतिनायकयोनिर्णयं सामाजिकानां विवेके एव क्षिपति सः।

भासस्यैव लेखनी इयमस्ति यत् भीष्मद्रोणकृष्णप्रभृतयो नायका अपि प्रतिनायकश्रेण्यामायान्ति। अथवा तेषां गर्हितकर्मणां परिप्रेक्ष्ये अपराधिन एव चित्रितास्ते। तथा च दुर्योधनकर्णप्रभृतयः पात्राः नायकरूपेण प्रस्तुताः। अत्र स्पष्टमिदं यत् नायकप्रतिनायकयोर्भूमिका परस्परयोः सम्पूरिका एव। नायकप्रतिनायकयोर्मध्ये यः संघर्षो भवति तस्य मूले कवेर्लेखकस्य सा भावना बलीयसी भवति यत् तस्य विचारवीथी कीदृशी? स कथानकस्य कं अंशः प्रकटयितुम् इच्छति तथा च सामाजिकेभ्य कं सन्देशं सम्प्रेषितुम् इच्छति।

भासकृत नाटकानामनुशीलनेन आधारेण निष्कर्षरूपेण इति वक्तुं शक्यते यत् भासः स्वपात्राणां जीवन्तं मनोवैज्ञानिकं स्वाभाविकं च चरित्रचित्रणः कृतः अस्ति। न तुं नायकप्रतिनायकयोर्दष्टया। अतः तस्य महाभारतकथाश्रित रूपकेषु (उरूभंगम्, पंचरात्रम्, दूतवाक्यम्, मध्यमव्यायोगः, सदृश नाटकाः) यत्र नायकप्रतिनायकयोः द्वयोः उद्धत्तकोट्यामेव भवन्ति तत्र भासः नायक–प्रतिनायकयोर्निर्णयः सामाजिकानोपरि क्षिप्तः।

रूपकेषु वा नाटकेषु कथाविस्तार दृष्ट्या इदं कथितुं शक्यते यत् यत्र प्रतिनायकयोजना भवति तथा च प्रतिनायकोऽपि नायक इव सशक्तः दृश्यते चेत् स नायकस्य चरित्रमपि उत्कर्षयति। अस्तु कथ्यते यत् प्रतिनायक भूमिका सा शिलापट्टिका भवति यत्र पतित्वा नायकस्य चरित्रं ततोऽपि प्रबलतरं सशक्तंच जायते। यथा अन्धकारस्य अभावे प्रकाशस्य, दुःखाभावे सुखस्य, संघर्षाभावे शान्तेः, दोषाभावे गुणानां उचितं सत्यंच मूल्यांकनं नैव सम्भवति तथैव बाधकतत्वानामभावे साध्यस्य प्रतिनायकामानाभावे च नायकस्य गुणवत्तायाः समाकलनं नैव शक्यते। अतएव काव्येषु रूचिसम्पादनाय प्रायशः लेखकः प्रतिनायकरूपिब्रह्मास्त्रस्य प्रयोगं नायकेन सामाजिकेषु विद्धाति। नायकः प्रतिनायकरूपिणि निकषे तप्त्वैव स्वर्ण इव समुज्ज्वलतां प्राप्य सामाजिकेभ्यः सत्प्रवृत्तेः असन्निवृत्तेश्चमार्गं प्रथयति।

महाकविभास्य रूपकाः अनयादृष्ट्याऽपि सामाजिकानां प्रेरयन्ति। भासः स्वरूपकेषु नायकप्रतिनायकौ उभयोः समानमहत्त्वं प्रदत्तश्च नायक प्रतिनायकेयोर्निणयः सामाजिकोपरिक्षिप्तः।

## सन्दर्भ ग्रंथ सूची


1. बालचरित– प्रथम अंक पृष्ठ– 19–27 भासनाटक चक्र इति ग्रंथात्
2. बाल0– द्वितीय अंक पृष्ठ– 37–47 भासनाटक चक्र इति ग्रंथात्
3. बाल0– तृतीय अंक श्लोक 2, 3
4. बाल0– तृतीय अंक पृष्ठ– 61–67
5. बाल0– पृष्ठ– 73–97
6. बाल0– पंचम भाग पृष्ठ– 85–95
7. संस्कृत साहित्य का इतिहास पृष्ठ' 521
8. पंचरात्रम् प्रथम अंक– 31–33
9. पंच0–तृतीय अंक 25
10. पंच0– प्रथम अंक – 23
11. पंच0– प्रथम अंक – 32

12. पंच0– प्रथम अंक –37
13. पंच0– प्रथम अंक – 38
14. पंच0– प्रथम अंक – 41
15. पंच0– तृतीय अंक – 4, 24
16. पंच0– प्रथम अंक पृ0–32
17. पंच0– प्रथम अंक पृ0–34
18. पंच0– प्रथम अंक श्लोक 35, 48
19. पंच0– प्रथम अंक पृ0–34
20. पंच0– प्रथम अंक पृ0–37
21. पंच0– प्रथम अंक 3, 2/2, 13, 16, 19
22. पंच0– प्रथम अंक पृ0–32 श्लोक 36, 39
23. पंच0–प्रथम अंक श्लोक 41
24. मध्यमव्यायोग श्लोक–9
25. मध्यम0– श्लोक–37
26. मध्यम0– श्लोक–34
27. मध्यम0– श्लोक–35, 36, 42, 45, 46, 48
28. सं ना0 पृ0 89, 100
29. मध्यम0 पृ0 40
30. मध्यम0 श्लोक–47
31. मध्यम0 श्लोक–50
33. मध्यम0 पृ0–39
33. दूतवाक्यम् श्लोक–16
34. दूत0 पृ0–250
35. दूत0 पृ0–242
36. दूत0 श्लोक–32
37. दूत0 श्लोक–33
38. दूत0 श्लोक–34
39. दूत0 श्लोक–35
40. दूत0 श्लोक–38
41. दूत0 श्लोक–39
42. कर्णभार –22
43. कर्णभार–23

44. दूत घटोत्कच्छ श्लोक–44
45. दूत घटो0 45
46. दूत घटो0 46
47. दूत घटो0 47
48. दूत घटो0 48
49. दूत घटो0 49, 50
50. दूत घटो0 11, 51, 11
51. दूत घटो0 18
52. उरूभंग पृ0– 346
53. उरू0 श्लोक 31
54. उरू0 श्लोक 33
55. उरू0 श्लोक 35
56. उरू0 श्लोक 53, 58, 63
57. उरू0 श्लोक 361, 363
58. उरू0 49
59. उरू0 61
60. उरू0 34, 35
61. ध्वन्यालोक 312